# श्रीगान्धर्वासम्प्रार्थनाष्टकम्

वृन्दावने विहरतोरिह किलेकुञ्जे
मत्तद्विपप्रवरकौतुकविभ्रमेण ।
सन्दर्शयस्व युवयोर्वदनारविन्द
द्वन्द्वं विधेहि मयि देवि कृपां प्रसीद ॥१ ॥

हा देवि काकुभरगद्गदयाद्य वाचा
याचे निपत्य भुवि दण्डवदुद्भटार्तिः ।
अस्य प्रसादमबुधस्य जनस्य कृत्वा
गान्धर्विके निजगणे गणनां विधेहि ॥२ ॥

श्यामे रमारमणसुन्दरतावरिष्ठ
सौन्दर्यमोहितसमस्तजगज्जनस्य ।
श्यामस्य वामभुजबद्धतनुं कदाहं
त्वामिन्दिराविरलरूपभरां भजामि ॥३ ॥

त्वां प्रच्छदेन मुदिरच्छविना पिधाय
मञ्जीरमुक्तचरणां च विधाय देवि ।
कुञ्जे व्रजेन्द्रतनयेन विराजमाने
नक्तं कदा प्रमुदितामभिसारयिष्ये ॥४ ॥

कुञ्जे प्रसूनकुलकल्पितकेलितल्पे
संविष्टयोर्मधुरनर्मविलासभाजोः ।
लोकत्रयाभरणयोश्चरणाम्बुजानि
संवाहयिष्यति कदा युवयोर्जनोयम् ॥५ ॥

त्वत्कुण्डरोधसि विलासपरिश्रमेण
स्वेदाम्बुचुम्बिवदनाम्बुरुहश्रियो वाम्।
वृन्दावनेश्वरि कदा तरुमूलभाजो
संवीजयामि चमरीचयचामरेण ॥६॥

लीनां निकुञ्जकुहरे भवतीं मुकुन्दे
चित्रैव सूचितवतीं रुचिराक्षि नाहम्।
भुग्नां भ्रुवं न रचयेति मृषारुषां त्वाम्
अग्रे व्रजेन्द्रतनयस्य कदा नु नेष्ये ॥७॥

वाग्युद्धकेलिकुतुके व्रजराजसूनुं
जित्वोन्मदामधिकदर्पविकासिजल्पाम्।
फुल्लाभिरालिभिरनल्पमुदीर्यमाण
स्तोत्रां कदा नु भवतीमवलोकयिष्ये ॥८॥

यः कोपि सुष्ठु वृषभानुकुमारिकायाः
सम्प्रार्थनाष्टकमिदं पठति प्रपन्नः।
सा प्रेयसा सह समेत्य धृतप्रमोदा
तत्र प्रसादलहरीमुररीकरोति ॥९॥

इति श्रीरूपगोस्वामिना विरचितायां स्तवमालायां श्रीगान्धर्वासम्प्रार्थनाष्टकम्सम्पूर्णम्।